(1) write a short note in sanskrit any one of the following:

त्रिवर्ग : "त्रिवर्ग" इत्यस्य प्रसङ्गेन महामतिना कौटिल्येन उक्तम्
"सामर्ग्यजुर्वेदास्त्रयस्त्रयी", सामवेदः ऋग्वेदो यजुर्वेद इति त्रय-
-स्त्रयीपदवाच्याः, अथर्ववेदः इतिहासवेदो महाभारतादि शिक्षा पदेशापरम्
आश्वलायनादि प्रणीतं सूत्रम्, व्याकरणं शब्दानुशासनं पाणिनीया
दि, निरुक्तं निर्वचनशास्त्रं यास्कप्रणीतम्, छन्दोविचितिः छन्दः
शास्त्रं पैङ्गलादि, ज्योतिषं सूर्यादि गत्यादि प्रतिपादकं शास्त्रम्,

त्रय्या फलं वक्तुमाह एष इति, एष त्रय्योधर्म त्र्युपदिष्टः धर्मः
चतुर्णां ब्राह्मणादिवर्णानां ब्रह्मचर्याद्याश्रमाणां च उपकारिकः उपकार-
फलः, कस्मात् स्वधर्मस्थापनात् स्वधर्मेषु स्थापनात् स्वधर्मानुपादेशेप
तेषु नियन्त्रणाद्, अर्थात् वर्णाश्रमाणाम्,
वर्णधर्मं विवृणोति - स्वधर्म इत्यादि, शास्त्राजीवः शस्त्रेण आजीवः वृत्तिः,
भूतरक्षणं प्राणिपालनम्, कृषि पशुपाल्ये कृषिः केदारेषु बीज वापपरि-
कर्मादिविधानम्, पशुपाल्यं पशुपालनकर्म गवाश्वादीनां पोषणचिकित्
सादि, वणिज्या क्रय विक्रयव्यवहारः, द्विजातिशुश्रूषा द्विजातयो
ब्रह्मक्षत्रियवैश्याः तेषां परिचरणम्, वार्ता कृषिपाशुपाल्यवणिज्याः
कारुकुशीलवकर्म शिल्पिकर्म चारणकर्म च,